# संस्कृत वार्ता:

दिनाङ्क : 07/09/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- केन्द्रीयगृहमन्त्री अमितशाहः अद्य गोवायाः पणजी-नगरे पश्चिमक्षेत्रीय-परिषदः अष्टाविंशतितमस्य उपवेशनस्य अध्यक्षतां कृतवान्; तत्र गोवारक्षि-बलाय प्रतिष्ठितं प्रेसिडेंट्स् पुलिस कलर इति विशिष्ट-ध्वज-सम्माननं प्रदत्तवान्।
- विदेशमन्त्री डॉ. एस्. जयशङ्करः लक्ज़मबर्गदेशस्य उपप्रधानमन्त्रिणा, जेवियर् बेटेल् इत्यनेन सह उपवेशनं कृतवान्; उक्तवान् च यत् यदा सम्पूर्णं विश्वम् अनिश्चिततां प्रति चिन्तितम् अस्ति, तादृशे काले भारत-लक्ज़मबर्ग-देशयोः मध्ये विश्वसनीयाः सम्बन्धाः सन्ति।
- राष्ट्रियराजधान्याः सत्यनिकेतन-क्षेत्रे भवन-पतनेन मृतानां सङ्ख्या संवर्ध्य सप्त यावत् उपगता वर्तते। दिल्ली-नगर-निगमस्य दक्षिण-क्षेत्रस्य उपायुक्तं समेत्य चत्वार: अभियन्तार: तात्कालिक-प्रभावेण निलम्बिताः ।
- भारतर्तुविज्ञान-विभागेन संसूचितं यत् श्वः यावत् बिहार-मध्यप्रदेश-पूर्वउत्तरप्रदेश-उत्तराखण्ड-पश्चिमबङ्गाल-पूर्वोत्तरभारत इत्येतेषां केषुचित् भागेषु च अतिवृष्टेः सम्भावना अस्ति।
- विश्व-दिव्याङ्ग-धनुर्विद्या-शृङ्खलायां, शीतल-देवी अन्तिम-चक्रे प्रवेशं लब्ध्वा भारतस्य कृते पदकं सुनिश्चितवती ।
- अपि च, टेनिस-स्पर्धायां, पूर्वतन-विजेतारौ अरीना सबालेंका अथ कार्लोस अल्करासः यू.एस.-ओपन् प्रतियोगितायाः प्रागुपान्त्यचक्रे स्वस्थानं रक्षितवन्तौ।

<u>----------------------------------------------------------</u>

<u>अमितशाहस्य गोवायात्रा</u>

केन्द्रीयगृहमन्त्री अमितशाहः अद्य गोवायाः पणजी-नगरे पश्चिमक्षेत्रीयपरिषदः अष्टाविंशतितमस्य उपवेशनस्य अध्यक्षतां कृतवान्। परिषदि गोवा-गुजरात-महाराष्ट्रैः सह केन्द्रशासितप्रदेशौ दादरा-नगरहवेली-दमन-दीव इत्येतौ च सम्मिलितौ स्तः। उपवेशने गोवायाः मुख्यमन्त्री प्रमोदसावन्तः, गुजरातस्य मुख्यमन्त्री भूपेन्द्रपटेलः, महाराष्ट्रस्य मुख्यमन्त्री देवेन्द्रफडणवीसः च भागं गृहीतवन्तः। दादरा-नगर-हवेली-दमन-दीव इत्येतयोः प्रतिनिधयः अपि उपवेशने भागं गृहीतवन्तः। उपवेशनस्य कार्यसूचौ केन्द्र-राज्ययोः मध्ये सामान्यहितसम्बद्धानि प्रकरणानि अथ संयुक्तरूपेण कार्याचरणं च सदृशाः विषयाः समाविष्टाः आसन्।

---

**अमितशाहः - गोवा-यात्रा**

केन्द्रीयगृहमन्त्री अमितशाहः तलेगाँव्-स्थिते डॉ. श्यामाप्रसादमुखर्जी-इण्डोर-स्टेडियम् इत्यस्मिन् क्रीडाङ्गणे आयोजिते समारोहे गोवारक्षि-बलाय प्रतिष्ठितं प्रेसिडेंट्स् पुलिस कलर इति विशिष्ट-ध्वज-सम्माननं प्रदत्तवान्। प्रेसिडेंट्स् पुलिस कलर इति ध्वजः ‘राष्ट्रपति का निशान’ इति नाम्ना अपि प्रख्यातः, सः कस्मैचित् आरक्षि-बलाय प्रदीयमानेषु सर्वोच्चसम्मानेषु अन्यतमः अस्ति। अनेन सम्मानेन गोवारक्षि-बलस्य राज्यस्य जनान् प्रति समर्पितसेवा, अनुशासनं प्रतिबद्धता च सम्मानिता भवति। केन्द्रीयगृहमन्त्री अमितशाहः सम्प्रति प्रचलिते अस्मिन् समारोहे भागं गृह्णाति।

---

**प्रधानमन्त्री - गुजरात-महाराष्ट्र-यात्रा**

प्रधानमन्त्री नरेन्द्रमोदी श्वः गुजरात-महाराष्ट्रयोः यात्रायै प्रस्थास्यति। वडोदरायां प्रधानमन्त्री पञ्चत्रिंशत्सहस्र-कोटिरूप्यतोप्यधिकमूल्यानां विभिन्नविकास-परियोजनानां शिलान्यासं उद्घाटनं च कृत्वा एतानि राष्ट्राय समर्पयिष्यति। महाराष्ट्रस्य मुम्बईनगरे प्रधानमन्त्री ऐषमः ग्लोबल् फिनटेक् फेस्ट् इत्यस्य उद्घाटनं करिष्यति।

---

## उपराष्ट्रपतिः

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् अद्य युवानः मादकद्रव्याणां दुरुपयोगस्य विरुद्धं सुदृढं पक्षं स्वीकर्तुं, मादकद्रव्यविहीन-समाजस्य निर्माणे च सक्रियतया योगदानं दातुम् आहूतवान्। असमस्य गुवाहाटी-विश्वविद्यालये आयोजिते कार्यक्रमे विद्यार्थिनः सम्बोधयन् उपराष्ट्रपतिः युवकेभ्यः मादकद्रव्याणां विरुद्धे सङ्घर्षे प्रतिबद्धतया स्थातुम् आग्रहं कृतवान्। सः उपस्थितान् जनान् मादकद्रव्य-विहीनसमाजस्य निर्माणाय कार्यं कर्तुं संकल्पं कारितवान्।

---------------------------------------------------------

## जयशङ्करस्य लक्ज़मबर्गस्य उपप्रधानमन्त्रिणा सह मेलनम्

विदेशमन्त्री डॉ. एस्. जयशङ्करः उक्तवान् यत् यदा सम्पूर्णं विश्वम् अनिश्चिततां प्रति चिन्तितम् अस्ति, तादृशे काले भारत-लक्ज़मबर्ग-देशयोः मध्ये विश्वसनीयाः सम्बन्धाः सन्ति। डॉ. जयशङ्करः अद्य मध्याह्ने नवदिल्ल्यां लक्ज़मबर्गदेशस्य उपप्रधानमन्त्रिणा, विदेशव्यापारमन्त्रिणा च जेवियर् बेटेल् इत्यनेन सह उपवेशनावधौ वक्तव्यमिदं प्रदत्तवान्। डॉ. जयशङ्करः वर्षस्य प्रारम्भे कृतां स्वकीयां लक्ज़मबर्ग-यात्राम् अपि स्मृतवान्। विदेशमन्त्री उक्तवान् यत् वाणिज्यं, निवेशः, वित्तीयसहकारश्च उभयोः देशयोः सम्बन्धानां केन्द्रे स्थिताः सन्ति। जेवियर् बेटेल् स्वीयसम्बोधने उक्तवान् यत् लक्ज़मबर्गदेशस्य भारतस्य च मध्ये विश्वसनीयाः सुदृढाश्च सम्बन्धाः सन्ति। श्री बेटेल् अद्य उषःकाले भारतस्य त्रिदिवसीययात्रायै नवदिल्ल्यां सम्प्राप्तवान्।

---------------------------------------------------------

## दिल्ली-भवनदुर्घटना

राष्ट्रियराजधान्याः सत्यनिकेतन-क्षेत्रे भवन-पतनेन मृतानां सङ्ख्या संवर्ध्य सप्त यावत् उपगता वर्तते। अखिल-भारतीय-आयुर्विज्ञान-संस्थानेन विज्ञापितं यत् दुर्घटना-स्थलात् द्वादशजनाः चिकित्सालयं नीताः । तेषु षण्णां पूर्वमेव मृत्युः अभवत्, एकश्च उपचारावसरे प्राणम् अत्यजत् । एम्स-प्रशासनेन प्रत्यपादि यत् एतेषु त्रयः अतीव सङ्कटापन्नायां स्थितौ वर्तन्ते, द्वयोः अवस्था

स्थिरा वर्तते। अत्रान्तरे, अस्याः दुर्घटनायाः अनन्तरं दिल्ली-सर्वकारेण दृढं प्रशासनिक-पदक्षेपं उत्थापयता दिल्ली-नगर-निगमस्य दक्षिण-क्षेत्रस्य उपायुक्तः राकेश-कुमारः, अधीक्षण-अभियन्ता रणवीर-सिंहः, कार्य-पालक-अभियन्ता ललित-कुमारः, सहायक-अभियन्ता सुनील-चौहानः, अथ च एकः कनिष्ठ-अभियन्ता इति पञ्च अधिकारिणः तात्कालिक-प्रभावेण निलम्बिताः ।

---------------------------------------------------------

## नेपाल - अकस्मादाप्लावेन मृतकानां सङ्ख्या

नेपाल-तिब्बत इत्येतयोः सहसा आगतेन विनाशकारिणा जलाप्लावेन मृतकानां सङ्ख्या पञ्चपञ्चाशदधिक-त्रयोदशशतं यावत् वर्धिता। राष्ट्रियापद्-सङ्कट-न्यूनीकरण-प्रबन्धन-प्राधिकरणस्य अनुसारं सर्वाधिकाः जनाः चितवन्-नगरे मृताः, अनन्तरं नवलपरासी पूर्व इत्यस्य स्थानम् अस्ति।

---------------------------------------------------------

## ऋतुविभागः

भारतर्तुविज्ञान-विभागेन संसूचितं यत् श्वः यावत् बिहार-मध्यप्रदेश-पूर्वउत्तरप्रदेश-उत्तराखण्ड-पश्चिमबङ्गाल-पूर्वोत्तरभारत इत्येतेषां केषुचित् भागेषु च अतिवृष्टेः सम्भावना अस्ति। ऋतुविभागेन उक्तं यत् श्वः यावत् आन्ध्रप्रदेश-झारखण्ड-ओडिशा-छत्तीसगढ-तमिलनाडु-राज्येषु मेघगर्जनेन सह वृष्टेः सम्भावना वर्तते।

---------------------------------------------------------

## दिव्याङ्ग-धनुर्विद्या

अहमदाबादे अद्य समायोज्यमानायाः विश्व-दिव्याङ्ग-धनुर्विद्या-शृङ्खलायाः तृतीय-चरणस्य तृतीये दिवसे वर्तमान-विश्व-विजेत्री शीतल-देवी अन्तिम-चक्रे प्रवेशं लब्ध्वा भारतस्य कृते पदकं सुनिश्चितवती । उभयोः भारतीययोः मध्ये सञ्जाते उपांत्य-द्वन्द्वे जम्मू-प्रदेशस्य शीतल-देव्या स्वदेशीया सरिता पञ्चचत्त्वारिंशदुत्तर-शततः त्रिचत्वारिंशदुत्तर-शताङ्कैः पराजित्य सुवर्ण-

पदकस्य निर्णायक-स्पर्धायां स्वस्थानं सुनिश्चितम्। अन्तिम-चरणे सा कज़ाकिस्तान-देशस्य आइज़ादा-सैदन् इत्यनया सह प्रतिस्पर्धिष्यति।

---------------------------------------------------------

## टेनिस्

टेनिस-स्पर्धायां पूर्वतन-विजेतारौ अरीना सबालेंका अथ कार्लोस अल्करासः यू.एस.-ओपन् प्रतियोगितायाः प्रागुपान्त्यचक्रे स्वस्थानं रक्षितवन्तौ।

।। इति वार्ता: ।।